AGLASEM

UBSE QUESTION *Papers*

HALF YEARLY EXAM

DOWNLOAD

अनुक्रमांक.....

नाम.....

मुद्रित पृष्ठों की संख्या : 04

अर्द्धवार्षिक परीक्षा 2022-2023

विषय – संस्कृत

समय – 3.00 घंटा कक्षा – 10 पूर्णांक – 80

निर्देशाः – 1. प्रश्नानां निर्देशाः ध्यानेन सावधानतया पठनीयाः।

2. अस्मिन प्रश्नपत्रे चत्वारः खण्डाः सन्ति।

3. प्रश्नपत्रे 21 प्रश्नाः च सन्ति। सर्वे प्रश्नाः अनिवार्याः सन्ति।

4. सर्वेषाम् प्रश्नानाम् अंकाः तेषां सम्मुखे लिखिताः सन्ति।

खण्डः – 'क' *(अपठितांश–अवबोधनम्)*

1. अधोलिखितं अनुच्छेदं पठित्वा अनुच्छेदाधारितानाम् प्रश्नानाम् उत्तराणि लिखत–

"मातरः सर्वभूतानां गावः सर्वसुखप्रदाः" उक्तकथनं गोश्रेष्ठतां प्रतिपादयति। वस्तुतस्तु गौः अस्माकं माता अस्ति यतः गौः स्व–अमृतोपमने दुग्धेन मातृवत् अस्मान् पालयति। गौराकृति अति सरला मनोहरा च भवति। गोमूत्रपानेन उदररोगाः नश्यन्ति। अस्माभिः गोपालनं गोरक्षणं च कर्तव्यम्। उक्तं च– गावो ममाग्रतः सन्तु, गावो मे सन्तु पृष्ठतः।

(क) एकपदेन उत्तरत– 1x2=2

(अ) सर्वसुखप्रदाः काः ? (ब) गौः कीदृशेन दुग्धेन अस्मान् पालयति?

(ख) पूर्णवाक्येन उत्तरत– 1

(अ) अस्माभिः किं कर्तव्यम्?

(ग) निर्देशानुसारम् उत्तरत–

(अ) 'गौः' इत्यस्य एकं पर्यायशब्दं लिखत। 1

(ब) 'गौराकृतिः' इत्यस्मिन् पदे सन्धिविच्छेदं कुरुत? 1

2. अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नानां उत्तरत–

संस्कृतभाषा राष्ट्रस्य ऐक्यं साधयति। दिव्या गीर्वाणवाणी सर्वभाषासु रम्या, मधुरा च अस्ति। संस्कृतस्य सूक्तयः अस्माकं जीवनस्य दिशां निर्धारयन्ति। जीवनस्य सर्वेषु संस्कारेषु संस्कृतस्य प्रयोगः भवति। संस्कृतस्य गौरवं प्रति कस्यापि हृदये संशयः नास्ति। सर्वे ज्ञानविज्ञान– संस्कृतिबोधकाः ग्रन्थाः मूलरूपेण संस्कृतभाषायामेव लिखिताः सन्ति। अत एव कथ्यते– "संस्कृतिः संस्कृताश्रिता"।

(क) एकपदेन उत्तरत– 1x2=2

(अ) का राष्ट्रस्य ऐक्यं साधयति?

(ब) संस्कृतसूक्तयः कस्य दिशां निर्धारयन्ति?

(ख) पूर्णवाक्येन उत्तरत– 2

(अ) जीवनस्य केषु क्षेत्रेषु संस्कृतस्य प्रयोगः भवति ?

(ब) गीर्वाणवाणी सर्वभाषासु कीदृशी अस्ति ?

(ग) निर्देशानुसारम् उत्तरत– 2

(अ) 'दिव्या' इत्यस्य विशेष्यपदं किम्।

(ब) "अत एव कथ्यते' इत्यत्र क्रियापदं किम् ?

(घ) अस्य अनुच्छेदस्य उपयुक्तं शीर्षकं लिखत। 1

खण्डः–'ख' *(संस्कृतेन रचनात्मकं कार्यम्)*

3. विद्यालयस्य वार्षिकोत्सवम् अधिकृत्य मित्रं प्रति लिखित–पत्रे मञ्जूषायां प्रदत्तै पदैः रिक्तस्थानानि पूरयत– 4

मञ्जूषा–प्रशंसां, मुख्यातिथिः, उत्तमेभ्यः, वार्षिकोत्सवः

प्रिय मित्र !

गतसप्ताहे विद्यालयस्य (i)..... आसीत्। कार्यक्रमस्य (ii)..... शिक्षानिदेशक–महोदयः आसीत्। सः कार्यक्रमस्य बहु (iii)..... कृतवान्। तेन (iv). ....छात्रेभ्यः पुरस्काराः अपि दत्ताः।

पितृभ्यां प्रणामं वदतु ।

तव मित्रम्

.....

4. मञ्जूषातः पदानि चित्वा अधोलिखितं संवादम् पूरित्वा लिखत– 4

मञ्जूषा–गणेश–लक्ष्मी, दीपाः, हर्षोल्लासेन, जनाः

सुरभिः – सुरेश! कस्मिन् पर्वणि.....प्रज्वाल्यन्ते।

सुरेशः – भगिनि! दीपावलीपर्वणि ..... दीपान् ज्वालयन्ति।

सुरभिः – भारतीयाः वयं ..... पूजनम् अपि कुर्मः।

सुरेशः – सर्वे दीपावली–उत्सवं ..... आचरन्ति।

5. 'विद्यालये वन–महोत्सवः' इति विषयमधिकृत्य मञ्जूषायां प्रदत्तैःपदैः चर्तुवाक्यानि (4 वाक्य) रचयत– 8

मञ्जूषा–वृक्षाणां, संरक्षणं, पुण्यं कर्तव्यं, विद्यालये, वनमहोत्सवः, छात्राः शिक्षकाः, आम्राः–अशोकः–बिल्वं–पिप्पलवृक्षाः, प्रतिदिनं, सिञ्चनम्

खण्डः–'ग' *(अनुप्रयुक्तं व्याकरणम्)*

6. अधोलिखितेषु रेखांकितपदेषु सन्धिं/विच्छेदं कुरुत– 3

(क) गावः मातृभूमिः + च सदा पूज्या।

(ख) अनुक्तम् + अपि अवगच्छति धीमान् पुरुषः।

(ग) शरीरायासजननं कर्म व्यायामः कथ्यते।

7. अधोलिखितेषु रेखांकितपदेषु समासं/विग्रहं कृत्वा लिखत– 3

(क) मुनिना पीताम्बरं धृतम।

(ख) तपोवनस्य वासिनः देवीति नाम्ना आह्वयन्ति।

(ग) हरिताः तरवः एव प्रकृतेः प्राणाः।

8. अधोलिखितेषु रेखांकितपदेषु प्रकृति–प्रत्ययौ संयोज्य लिखित– 3

(क) सुशीला सुन्दरी बाल+टाप् अस्ति।

(ख) श्रीमद्भगवद्गीता अवश्यं पठ+तव्यत्।

(ग) आयु+मतुप् भव पुत्रि!

9. अधोलिखितेषु वाक्यषु मञ्जूषायां प्रदत्तैः अव्ययपदैः वाक्यानि पूरयत– 3

मञ्जूषा–विना, सहसा, कुत्र

(क) व्यायामिन.....जरा न समधिरोहति।

(ख) ज्ञानं.....नैव मुक्तिः।

(ग) प० गोविन्दवल्लभपन्त–वर्यस्य जन्म.....अभूत।

10. अधोलिखित–वाक्यानां वाच्य–परिवर्तनं कुरुत – 3

(क) अहं प्रतिदिनं गृहस्वाध्यायं करोमि।

(ख) मया वाल्मीकिरामायणं पठ्यते।

(ग) छात्रेण विद्यालयः गम्यते। –

11. मञ्जूषायां वादनं दृष्ट्वा संस्कृतेन समयं लिखत। राजेशः कदा किं करोति– 4

मञ्जूषाः क–3:30 वादनम्, ख–4:45 वादनम्, ग–8:15 वादनम्, घ– 10:00 वादनम्

(क) राजेशः.....वादने सङ्गणक–शिक्षणार्थं गच्छति।

(ख) सः.....वादने योगासनं करोति।

(ग) सः.....वादने स्वाध्यायं करोति।

(घ) राजेशः रात्रौ ..... वादने शयनं करोति।

12. अधोलिखितवाक्ययोः शब्देषु संस्कृत–सङ्ख्यां लिखत– 2

(क) ऋतवः (06) .... भवन्ति।

(ख) अहं (85) ..... रुप्यकैः पुस्तकं क्रीतवान्।

13. रेखाङ्कितपदानि शुद्धानि कृत्वा पूर्णवाक्यं लिखत– 3

(क) बालिकाः पठनार्थं पुस्तकालयं गच्छति। (ख) सः बालकाः सन्ति।

(ग) श्वः कार्यक्रमः आसीत्।

खण्डः–'घ' *(पठित–अवबोधनम्)*

14. अधोलिखित–गद्यांशं पठित्वा तत् आधारितान् प्रश्नान् उत्तरत–

विचित्रा दैवगतिः। तस्यामेव रात्रौ गृहे कश्चन चौरः गृहाभ्यन्तरं प्रविष्टः। तत्र निहितामेकां मञ्जूषाम् आदाय पलायितः। चौरस्य पादध्वनिना प्रबुद्धोऽतिथिः चौरशङ्कया तमन्वधावत् अगृह्णाच्च, परं विचित्रमघटत। चौरः एव उच्चैः क्रोशितुमारभत–"चौरोऽयं चौरोऽयम्" इति।

(क) एकपदेन उत्तरत– 1

(अ) चौरः कुत्र प्रविष्टः ?

(ख) पूर्णवाक्येन उत्तरत– 2

(अ) चौरस्य पादध्वनिना कः प्रबुद्धः ? (ब) चौरः उच्चैः किं क्रोशितुमारभत ?

(ग) निर्देशानुसारम् उत्तरत– 2

(अ) 'निहितामेकाम्' इत्यत्र सन्धि–विच्छेदं कुरुत ।

(ब) "विचित्रा दैवगतिः" अत्र विशेषणपदं किम् ?

15. श्लोकाधारितम् प्रश्नान् उत्तरत–

अमन्त्रमक्षरं नास्ति, नास्ति मूलमनौषधम्।
अयोग्यः पुरुषः नास्ति योजकस्तत्र दुर्लभः।।

(क) एकपदेन उत्तरत– 1

(अ) अक्षरं किं नास्ति ?

(ख) पूर्णवाक्येन उत्तरत– 2

(अ) अनौषधं किं नास्ति ? (ब) तत्र कः दुर्लभः ?

(ग) निर्देशानुसारम् उत्तरत– 2

(अ) 'न औषधम्' इत्यत्र समासं कुरुत । (ब) 'सुलभः' इत्यस्य विलोमपदं किं प्रयुक्तम्?

16. अधोलिखितं नाट्यांशं पठित्वा प्रश्नान् उत्तरत–

रामः – एषः भवतो सौन्दर्यावलोकजनितेन कौतूहलेन पृच्छामि क्षत्रियकुल–पितामहयोः सूर्यचन्द्रयोः को वा भवतोर्वंशस्य कर्ता ?

लवः – भगवन् सहस्रदीधितिः।
रामः – कथमस्मत्समानाभिजनौ संवृतौ?
विदूषकः – किं द्वयोरप्येकमेव प्रतिवचनम्?
लवः – भ्रातरावावां सौदर्यौ।
रामः – समरूपः शरीरसन्निवेशः। वयसस्तु न किंचिदन्तरम्।
लवः – आवां यमलौ। 1

(क) एकपदेन उत्तरत–
(अ) लवकुशयोः वंशस्य कर्ता कः? 2

(ख) पूर्णवाक्येन उत्तरत–
(अ) रामः लवकुशयोः कौतूहलेन किं पृच्छति ?
(ब) अत्र यमलौ कौ ? 2

(ग) निर्देशानुसारम् उत्तरत–
(अ) 'सूर्यः' अस्य पर्यायपदं नाट्यांशे किं प्रयुक्तम्?
(ब) 'आवां यमलौ' अत्र 'आवाम्' इति सर्वनामपदं कस्मै प्रयुक्तम् ?

17. अधोलिखितयोः श्लोकयोः भावार्थं समुचितपदैः पूरयत–

(क) पिता यच्छति पुत्राय बाल्ये विद्याधनं महत्। 2
पिताऽस्य किं तपस्तेपे इत्युक्तिस्तत्कृतज्ञता।।
भावार्थः– पिता.....बाल्ये महत् विद्याधनं यच्छेति। अस्य पिता किं तपः तेपे इत्युक्तिः.....।

(ख) विचित्रे खलु संसारे नास्ति किंचित् निरर्थकम्। 2
अश्वश्चदे धावने वीरः भारस्य वहने खरः।।
भावार्थः– अस्मिन् विचित्रे.....किंचित् व्यर्थं नास्ति। धावने यदि.....वीरः मन्यते तथैव भारवहने खरः वीरः मन्यते।

18. अधोलिखितस्य श्लोकस्य अन्वयं पूरयत– 2
सम्पत्तौ च विपत्तौ च महतामेकरूपता।
उदये सविता रक्तो रक्तश्चास्तमये तथा।।
अन्वयः–.....सम्पत्तौ विपत्तौ च एकरूपता भवति। .....उदये रक्तः तथा अस्तमये च रक्तः भवति।

19. रेखांकितपदमाधृत्य प्रश्ननिर्माणं कुरुत– 2
(क) प्रकृत्याः सन्निधौ वास्तविकं सुखं विद्यते। (ख) पुरा त्वया महयं व्याघ्रत्रयं दत्तम्।
(ग) सर्वे प्रकृति–मातरं प्रणमन्ति। (घ) सः भारवहनाय क्रन्दति स्म।

20. अधोलिखितानि वाक्यानि उचित घटनाक्रमेण संयोजयत– 3
(क) सर्वं वृत्तम् अवगत्य सः तं निर्दोषम् अमन्यत्।
(ख) न्यायाधीशो बंकिमचन्द्रः उभाभ्यां पृथक्–पृथक् विवरणं श्रुतवान्।
(ग) आरक्षिणं च दोषभाजनम्।
(घ) ततोऽसौ तौ अग्रिमे दिने उपस्थातुम् आदिष्टवान्।
(ङ) किन्तु प्रमाणाभावात् सः निर्णेतुं नाशक्नोत्।
(च) अन्येद्युः तौ न्यायालये स्व–स्व पक्षं पुनः स्थापितवन्तौ।

21. संस्कृतेन वाक्यप्रयोगं कुरुत– 2
(क) सविता (ख) मयूरः

◆◆◆◆◆◆

QUESTION PAPERS

GET PREVIOUS YEAR QUESTION PAPERS FOR ALL CLASSES FOR CBSE, ISCSE, ISC AND ALL ALL STATE BOARDS HERE AT AGLASEM.COM

BOARD WISE

- Andhra Pradesh Board Question Papers
- Assam Board Question Papers
- Bihar Board Question Papers
- Chhattisgarh Board Question Papers
- Goa Board Question Papers
- Gujarat Board Question Papers
- Haryana Board Question Papers
- Himachal Pradesh Board Question Papers
- J&K State Board Question Papers
- Jharkhand Board Question Papers
- Karnataka Board Question Papers
- Kerala Board Question Papers
- Madhya Pradesh Board Question Papers
- Maharashtra State Board Question Papers
- Manipur Board Question Papers
- Meghalaya Board Question Papers
- Mizoram Board Question Papers
- Nagaland Board Question Papers
- Orissa Board Question Papers
- Punjab Board Question Papers
- Rajasthan Board Question Papers
- Tamil Nadu Board Question Papers
- Telangana State Board Question Papers
- Tripura Board Question Papers
- Uttarakhand Board Question Papers
- Uttar Pradesh (UP) Board Question Papers
- West Bengal (WB) Board Question Papers